
द्विखनवत्यष्टाशीतित्रये सत्त्वे पूर्वं व बन्धपदम्॥776॥ युग्मम्।)

पणवीसे तिगिणउदे एगुणतीसंदुगं दुणउदीए।

आदिमछक्कं बंधो णउदिचउक्केवि णऽडवीसं॥777॥

(पञ्चविंशे त्र्येकनवतौ एकोनत्रिंशद्विकं द्विनवत्याम्।

आदिमषट्कं बन्धो नवतिचतुष्केपि नाष्टविंशम्॥777॥)

छव्वीसे तिगिणउदे उणतीसं बंध दुगखणउदीए।

आदिमछक्कं एवं अउसीदितिए ण अडवीसं॥778॥

(षड्विंशे त्र्येकनवतौ एकोनत्रिंशं बन्धो द्विकखनवत्याम्।

आदिमषट्कमेवमष्टाशीतित्रये नाष्टविंशम्॥778॥)

सगवीसे तिगिणउदे णववीसदुबंधयं दुणउदीए।

आदिमछण्णउदितिए एयं अडवीसयं णत्थि॥779॥

(सप्तविंशे त्र्येकनवतौ नवविंशद्विबन्धको द्विनवत्याम्।

आदिमषण्णवतित्रये एवमष्टाविंशकं नास्ति॥779॥)

अडवीसे तिगिणउदे उणतीसदु दुजुदणउदिणउदितिये।

बंधो सगवीसं वा णउदीए अत्थि णडवीसं॥780॥

(अष्टाविंशे त्र्येकनवत्यामेकोनत्रिंशद्विकं द्वियुतनवतिनवतित्रये।

बन्धः सप्तविंशं वा नवतौ अस्ति नाष्टाविंशम्॥780॥)

अडवीसमिवुणतीसे तीसे तेणउदिसत्तगे बंधो।

णववीसेक्कत्तीसं इगिणउदी अट्ठवीसदुगं॥781॥

तेण दुणउदे णउदे अडसीदे बंधमादिमं छक्कं।

चुलसीदेवि य एवं णवरि ण अडवीसबंधपदं॥782॥ जुम्मं।

(अष्टविंश इवैकोनत्रिंशे त्रिंशे त्रिनवतिसत्त्वके बन्धः।

नवविंशैकत्रिंशमेकनवत्यामष्टविंशद्विकम्॥781॥

तेन द्विनवतौ नवतौ अष्टाशीतौ बन्ध आदिमं षट्कम्।

चतुरशीत्यामपि च एवं नवरि न अष्टविंशबन्धपदम्॥782॥

युग्मम्।)

तीसुदयं विगितीसे सजोग्गबाणउदिणउदितियसत्ते।

उवसंतचउक्कुदये सत्ते बंधस्स ण वियारो॥783॥

(त्रिंशोदयं वैकत्रिंशे स्वयोग्यद्वानवतिनवतित्रयसत्त्वे।

उपशान्तचतुष्कोदये सत्त्वे बन्धस्य न विचारः॥783॥)

णामस्स य बंधादिसु दुतिसंजोगा परूविदा एवं।

सुदवणवसंतगुणगणसायरचंदेण सम्मदिणा॥784॥

(नाम्नश्च बन्धादिषु द्वित्रिसंयोगाः प्ररूपिता एवम्।

श्रुतवनवसन्तगुणगणसागरचन्द्रेण सन्मतिना॥784॥)

6- प्रत्ययाधिकार

णमिऊण अभयणंदिं सुदसायरपारगिंदणंदिगुरुं।

वरवीरणं दिणाहं पयडीणं पच्चयं वोच्छं॥785॥

(नत्वा अभयनन्दिं श्रुतसागरपारगेन्द्रनन्दिगुरुम्।

वरवीरनन्दिनाथं प्रकृतीनां प्रत्ययं वक्ष्ये॥785॥)

मिच्छत्तं अविरमणं कसायजोगा य आसवा होंति।

पण बारस पणुवीसं पण्णरसा होंति तब्भेया॥786॥

(मिथ्यात्वमविरमणं कषाययोगौ च आस्रवा भवन्ति।

पञ्च द्वादश पञ्चविंशं पञ्चदश भवन्ति तद्भेदाः॥786॥)

चदुपच्चइगो बंधो पढमे णंतरतिगे तिपच्चइगो।

मिस्सगबिदियं उवरिमदुगं च देसेक्कदेसम्मि॥787॥

(चतुःप्रत्ययको बन्धः प्रथमे अनन्तरत्रिके त्रिप्रत्ययकः।

मिश्रकद्वितीये उपरिमद्विकं च देशैकदेशे॥787॥)

उबरिल्लपंचये पुण दुपच्चया जोगपच्चओ तिण्हं।

सामण्णपच्चया खलु अट्ठण्हं होंति कम्माणं॥788॥

(उपरिमपञ्चके पुनः द्विप्रत्ययौ योगप्रत्ययः त्रयाणाम्।

सामान्यप्रत्ययाः खलु अष्टानां भवन्ति कर्मणाम्॥788॥)

पणवण्णा पण्णासा तिदाल छादाल सत्ततीसा य।

चदुवीसा बावीसा बावीसमपुव्वकरणोत्ति॥789॥

थूले सोलसपहुदी एगूणं जाव होदि दसठाणं।

सुहुमादिसु दस णवयं णवयं जोगिम्मि सत्तेव॥790॥ जुम्मं।

(पञ्चपञ्चाशत् पञ्चाशत् त्रिचत्वारिंशत् षट्चत्वारिंशत्सप्तत्रिंशच्च।

चतुर्विंशतिः द्वाविंशतिः द्वाविंशमपूर्वकरण इति॥789॥

स्थूले षोडशप्रभृतय एकोना यावत् भवति दशस्थानम्।

सूक्ष्मादिषु दश नवकं नवकं योगिनि सप्तैव॥790॥ युग्मम्।)

पण चदु सुण्णं णवयं पण्णारस दोण्णि सुण्णछक्कं च।

एक्केक्कं दस जाव य एक्कं सुण्णं च चारि सग सुण्णं॥790-1॥

दोण्णि य सत्त य चोद्दसणुदयेवि एयार वीस तेत्तीसं।

पणतीस दुसिगिदालं सत्तेतालट्ठदाल दुसु पण्णं॥790-2॥ जुम्मं।

(पञ्चचतुष्कं शून्यं नवकं पञ्चदश द्वे शून्यं षट्कं च।

एकैकं दश यावच्च एकं शून्यं च चत्वारि सप्त शून्यम्॥790-1॥

द्वौ च सप्त च चतुर्दशानुदयेपि एकादश विंशं त्रयस्त्रिंशत्।

पञ्चत्रिंशत् द्वयोरेकचत्वारिंशत्सप्तचत्वारिंशदष्टचत्वारिंशत् द्वयोः

पञ्चाशत्॥790-2॥ युग्मम्।)

मिच्छे पणमिच्छत्तं पढमकसायं तु सासणे मिस्से।

सुण्णं अविरदसम्मे बिदियकसायं विगुव्वदुग कम्मं॥790-3॥

ओरालमिस्स तसवह णवयं देसम्मि अविरदेक्कारा।

तदियकसायं पण्णर पमत्तविरदम्मि हारदुगछेदो॥790-4॥

सुण्णं पमादरहिदे पुव्वे छण्णोकसायवोच्छेदो।

अणियट्टिम्मि य कमसो एक्केक्कं वेदतियकसायतियं॥790-5॥

सुहुमे सुहुमो लोहो सुण्णं उवसंतगेसु खीणेसु।

अलीयुभयवयणमणचउ जोगिम्मि य सुणह वोच्छामि॥790-6॥

सच्चाणुभयं वयणं मणं च ओरालकायजोगं च।

ओरालमिस्स कम्मं उवयारेणेव सब्भाओ॥790-7॥ कुलयं।

(मिथ्ये पञ्चमिथ्यात्वं प्रथमकषायस्तु सासादने मिश्रे।

शून्यमविरतसम्ये द्वितीयकषायः वैगूर्वद्विकं कर्म॥790-3॥

औरालमिश्रं त्रसवधः नवकं देशे अविरता एकादश।

तृतीयकषायः पञ्चदश प्रमत्तविरते आहारकद्विकच्छेदः॥790-4॥

शून्यं प्रमादरहिते अपूर्वे षण्णोकषायव्युच्छेदः।

अनिवृत्तौ च क्रमश एकैकं वेदत्रयकषायत्रयम्॥790-5॥

सूक्ष्मे सक्ष्मो लोभः शून्यमुपशान्तकेषु क्षीणेषु।

अलीकोभयवचनमनश्चतुष्कं योगिनि च शृणुत वक्ष्यामि॥790-6॥

सत्यानुभयं वचनं मनश्च औरालकाययोगश्च।

औरालमिश्रं कार्मणमुपचारेणैव सद्भावः॥790-7॥ कुलकम्।)

अवरादीणं ठाणं ठाणपयारा पयारकूडा य।

कूडुच्चारणभंगा पंचविहा होंति इगिसमये॥791॥

(अवरादीनां स्थानं स्थानप्रकाराः प्रकारकूटाश्च।

कूटोच्चारणभङ्गोः पञ्चविधा भवन्ति एकसमये॥791॥)

दस अट्ठारस दसयं सत्तर णव सोलसं च दोण्हंपि।

अट्ठ य चोद्दस पणयं सत्त तिये दुति दुगेगमेगमदो॥792॥

(दश अष्टादश दशकं सप्तदश नव षोडश च द्वयोरपि।

अष्ट च चतुर्दश पञ्चकं सप्त त्रिके द्वित्रिकं द्विकैकमेकमतः॥792॥)

एक्कं च तिण्णि पंच य हेट्ठुवरीदो दु मज्झिमे छक्कं।

मिच्छे ठाणपयारा इगिदुगमिदरेसु तिण्णि देसोत्ति॥793॥

(एकः च त्रयः पञ्च च अधस्तनोपरितस्तु मध्यमे षट्कम्।

मिथ्ये स्थानप्रकारा एकद्विकमितरेषु त्रयः देश इति॥793॥)

भयदुगरहियं पढमं एक्कदरजुदं दुसहियमिदि तिण्णं।

सामण्णा तियकूडा मिच्छा अणहीणतिण्णिवि य॥794॥

(भयद्विकरहितं प्रथममेकतरयुतं द्विसहितमिति त्रयः।

सामान्यानि त्रीणि कूटानि मिथ्या अनहीनत्रीण्यपि च॥794॥)

मिच्छत्ताणण्णदरं एक्केणक्खेण एक्ककायादी।

तत्तो कसायवेददुजुगलाणेक्कं च जोगाणं॥795॥

(मिथ्यात्वानामन्यतरमेकेनाक्षेण एककायादि।

ततः कषायवेदद्वियुगलानामेकं च योगानाम्॥795॥)

अणरहिदसहिदकूडे बावत्तरिसय सयाण तेणउदी।

सट्ठी धुवा हु मिच्छे भयदुगसंजोगजा अधुवा॥796॥

(अनरहितसहितकूटे द्वासप्ततिशतं शतानां त्रिनवतिः।

षष्ठिः ध्रुवा हि मिथ्ये भयद्विकसंयोगजा अध्रुवाः॥796॥)

चउवीसट्ठारसयं तालं चोद्दस असीदि सोलसयं।

छण्णउदी बारसयं बत्तीसं बिसद सोल बिसदं च॥797॥

सोलस बिसदं कमसो धुवगुणगारा अपुव्वकरणोत्ति।

अद्धुवगुणिदे भंगा धुवभंगाणं ण भेदादो॥798॥ जुम्मं।

(चतुर्विंशाष्टादशशतं चत्वारिंशच्चतुर्दशाशीतिः षोडशशतम्।

षण्णवतिः द्वादशशतं द्वात्रिंशद्विशतं षोडश द्विशतं च॥797॥

षोडश द्विषतं क्रमशो ध्रुवगुणकारा अपूर्वकरण इति।

अध्रुवगुणिते भङ्गा ध्रुवभङ्गानां न भेदात्॥798॥ युग्मम्।)

छप्पंचादेयंतं रूवुत्तरभाजिदे कमेण हदे।

लद्धं मिच्छचउक्के देसे संजोगगुणगारा॥799॥

(षट्पञ्चाद्येकान्तं रूपोत्तरभाजिते क्रमेण हते।

लब्धं मिथ्यचतुष्के देशे संयोगगुणकाराः॥799॥)

पडिणीगमंतराए उवघादो तप्पदोसणिण्हवणे।

आवरणदुगं भूयो बंधदि अच्चासणाएवि॥800॥

(प्रत्यनीकमन्तराय उपघातस्तत्प्रदोषनिह्नवने।

आवरणद्विकं भूयो बध्नाति अत्यासादनयापि॥800॥)

भूदाणुकंपवदजोगजुंजिदो खंतिदाणगुरुभत्तो।

बंधदि भूयो सादं विवरीयो बंधदे इदरं॥801॥

(भूतानुकम्पव्रतयोगयुञ्जितः क्षान्तिदानगुरुभक्तः।

बध्नाति भूयः सातं विपरीतो बध्नाति इतरत्॥801॥)

अरहंतसिद्धचेदियतवसुदगुरुधम्मसंघपडिणीगो।

बंधदि दंसणमोहं अणंतसंसारिओ जेण॥802॥

(अर्हत्सिद्धचैत्यतपःश्रुतगुरुधर्मसंघप्रत्यनीकः।

बध्नाति दर्शनमोहमनन्तसांसारिको येन॥802॥)

तिव्वकसाओ बहुमोहपरिणदो रागदोससंतत्तो।

बंधदि चरित्तमोहं दुविहंपि चरित्तगुणघादी॥803॥

(तीव्रकषायो बहुमोहपरिणतो रागद्वेषसंतप्तः।

बध्नाति चारित्रमोहं द्विविधमपि चारित्रगुणघाती॥803॥)

मिच्छो हु महारंभो णिस्सीलो तिव्वलोहसंजुत्तो।

णिरयाउगं णिबंधइ पावमई रुद्दपरिणामी॥804॥

(मिथ्यो हि महारम्भो निःशीलः तीव्रलोभसंयुक्तः।

निरयायुष्कं निबध्नाति पापमतिः रुद्रपरिणामी॥804॥)

उम्मग्गदेसगो मग्गणासगो गूढहियय माइल्लो।

सठसीलो य ससल्लो तिरियाउं बंधदे जीवो॥805॥

(उन्मार्गदेशको मार्गनाशको गूढहृदयो मायावी।

शठशीलश्च सशल्यः तिर्यगायुष्कं बध्नाति जीवः॥805॥)

पयडीए तणुकसाओ दाणरदी सीलसंजमविहीणो।

मज्झिमगुणेहिं जुत्तो मणुवाऊं बंधदे जीवो॥806॥

(प्रकृत्या तनुकषायो दानरतिः शीलसंयमविहीनः।

मध्यमगुणैः युक्तौ मानवायुष्कं बध्नाति जीवः॥806॥)

अणुवदमहव्वदेहिं य बालतवाकामणिज्जाराए य।

देवाउगं णिबंधइ सम्माइट्ठी य जो जीवो॥807॥

(अणुव्रतमहाव्रतैश्च बालतपोकामनिर्जरया च।

देवायुष्कं निबध्नाति सम्यग्दृष्टिश्च यो जीवः॥807॥)

मणवयणकायवक्को माइल्लो गारवेहिं पडिबद्धो।

असुहं बंधदि णामं तप्पडिवक्खेहिं सुहणामं॥808॥

(मनोवचनकायवक्रो मायावी गारवैः प्रतिबद्धः।

अशुभं बध्नाति नाम तत्प्रतिपक्षैः शुभनाम॥808॥)

अरहंतादिसु भत्तो सुत्तरुची पढणुमाणगुणपेही।

बंधदि उच्चागोदं विवरीओ बंधदे इदरं॥809॥

(अर्हदादिषु भक्तः सूत्ररुचिः पठनानुमननगुणदर्शी।

बध्नाति उच्चगोत्रं विपरीतो बध्नातीतरत्॥809॥)

पाणवधादीसु रदो जिणपूजामोक्खमग्गविग्घयरो।

अज्जेइ अंतरायं ण लहइ जं इच्छियं जेण॥810॥

(प्राणबधादिषु रतो जिनपूजामोक्षमार्गविघ्नकरः।

अर्जयति अन्तरायं न लभते यदीप्सितं येन॥810॥)

7- भावचूलिकाधिकार

गोम्मटजिणिंदचंदं पणमिय गोम्मटपयत्थसंजुत्तं।

गोम्मटसंगहविसयं भावगयं चूलियं वोच्छं॥811॥

(गोम्मटजिनेन्द्रचन्द्रं प्रणम्य गोम्मटपदार्थसंयुक्तम्।

गोम्मटसंग्रहविषयं भावगतां चूलिकां वक्ष्ये॥811॥)

जेहिं दु लक्खिज्जंते उवसमआदीसु जणिदभावेहिं।

जीवा ते गुणसण्णा णिद्दिट्ठा सव्वदरसीहिं॥812॥

(यैस्तु लक्ष्यन्ते उपशमादिषु जनितभावैः।

जीवास्ते गुणसंज्ञा निर्दिष्टाः सर्वदर्शिभिः॥812॥)

उवसम खइओ मिस्सो ओदयियो पारिणामियो भावो।

भेदा दुग णव तत्तो दुगुणिगिवीसं तियं कमसो॥813॥

(औपशमिकः क्षायिको मिश्र औदयिकः पारिणामिको भावः।

भेदा द्विकं नव ततो द्विगुणमेकविंशतिः त्रयः क्रमशः॥813॥)

कम्मुवसमम्मि उवसमभावो खीणम्मि खइयभावो दु।

उदयो जीवस्स गुणो खओवसमिओ हवे भावो॥814॥

कम्मुदयजकम्मिगुणो ओदयियो तत्थ होदि भावो दु।

कारणणिरवेक्खभवो सभावियो होदि परिणामो॥815॥ जुम्मं।

(कर्मोपशमे उपशमभावः क्षीणे क्षायिकभावस्तु।

उदयो जीवस्य गुणः क्षायोपशमिको भवेत् भावः॥814॥

कर्मोदयजकर्मिगुण औदयिकस्तत्र भवति भावस्तु।

कारणनिरपेक्षभवः स्वाभाविको भवति परिणामः॥815॥ युग्मम्।)

उवसमभावो उवसमसम्मं चरणं च तारिसं खइओ।

खाइय णाणं दंसण सम्म चरित्तं च दाणादी॥816॥

(उपशमभाव उपशमसम्यक्त्वं चरणं तादृशः क्षायिकः।

क्षायिकं ज्ञानं दर्शनं सम्यक्त्वं चारित्रं च दानादयः॥816॥)

खाओवसमियभावो चउणाण तिदंसण तिअण्णाणं।

दाणादिपंच वेदगसरागचारित्तदेसजमं॥817॥

(क्षायोपशमिकभावः चतुर्ज्ञानं त्रिदर्शनं त्र्यज्ञानम्।

दानादिपञ्च वेदकसरागचारित्रदेशयमम्॥817॥)

ओदयिया पुण भावा गदिलिंगकसाय तह य मिच्छत्तं।

लेस्सासिद्धासंजमअण्णाणं होंति इगिवीसं॥818॥

(औदयिकाः पुनः भावा गतिलिङ्गकषायास्तथा च मिथ्यात्वम्।

लेश्यासिद्धासंयमाज्ञानं भवन्ति एकविंशतिः॥818॥)

जीवत्तं भव्वत्तमभव्वत्तादी हवंति परिणामा।

इदि मूलुत्तरभावा भंगवियप्पे बहू जाणे॥819॥

(जीवत्वं भव्यत्वमभव्यत्वादयो भवन्ति परिणामाः।

इति मूलोत्तरभावा भङ्गविकल्पे बहवो जानीहि॥819॥)

ओघादेसे संभवभावं मूलुत्तरं ठवेदूण।

पत्तेये अविरुद्धे परसगजोगेवि भंगा हु॥820॥

(ओघादेशे संभवभावं मूलोत्तरं स्थापयित्वा।

प्रत्येके अविरुद्धे परस्वकयोगेपि भङ्गा हि॥820॥)

मिच्छतिये तिचउक्के दोसुवि सिद्धेवि मूलभावा हु।

तिग पण पणगं चउरो तिग दोण्णि य संभवा होंति॥821॥

(मिथ्यत्रये त्रिचतुष्के द्वयोरपि सिद्धेपि मूलभावा हि।

त्रिकं पञ्च पञ्चकं चत्वारः त्रिकं द्वौ च संभवा भवन्ति॥821॥)

तत्थेव मूलभंगा दसछव्वीसं कमेण पणतीसं।

उगुवीसं दस पणगं ठाणं पडि उत्तरं वोच्छं॥822॥

(तत्रैव मूलभङ्गा दश षड्विंशं क्रमेण पञ्चत्रिंशत्।

एकोनविंशं दश पञ्चकं स्थानं प्रति उत्तरं वक्ष्यामि॥822॥)

उत्तरभंगा दुविहा ठाणगया पदगयात्ति पढमम्मि।

सगजोगेण य भंगाणयणं णत्थित्ति णिद्दिट्ठं॥823॥

(उत्तरभङ्गा द्विविधाः स्थानगताः पदगता इति प्रथमे।

स्वकयोगेन च भङ्गानयनं नास्तीति निर्दिष्टम्॥823॥)

मिच्छदुगे मिस्सतिये पमत्तसत्ते य मिस्सठाणाणि।

तिग दुग चउरो एक्कं ठाणं सव्वत्थ ओदयियं॥824॥

(मिथ्यद्विके मिश्रत्रये प्रमत्तसप्तके च मिश्रस्थानानि।

त्रिकं द्विकं चत्वारि एकं स्थानं सर्वत्र औदयिकम्॥824॥)

तत्थावरणजभावा पणछस्सत्तेव दाणपंचेव।

अयदचउक्के वेदगसम्मं देसम्मि देसजमं॥825॥

(तत्रावरणजभावा पञ्चषट्सप्तैव दानपञ्चैव।

अयतचतुष्के वेदकसम्यं देशे देशयमम्॥825॥)

रागजमं तु पमत्ते इदरे मिच्छादिजेट्ठठाणाणि।

वेभंगेण विहीणं चक्खुविहीणं च मिच्छदुगे॥826॥

(रागयमं तु प्रमत्ते इतरस्मिन् मिथ्यादिजेष्ठस्थानानि।

वैभङ्गेन विहीनं चक्षुर्विहीनं च मिथ्यद्विके॥826॥)

अवधिदुगेण विहीणं मिस्सतिए होदि अण्णठाणं तु।

मणणाणेणवधिदुगेणुभयेणूणं तदो अण्णे॥827॥

(अवधिद्विकेन विहीनं मिश्रत्रये भवति अन्यत्स्थानं तु।
मनोज्ञानेनावधिद्विकेनोभयेनोनं ततः अन्यानि॥827॥)

लिंगकसाया लेस्सा संगुणिदा चदुगदीसु अविरुद्धा।
बारस बावत्तरियं तत्तियमेत्तं च अडदालं॥828॥
(लिङ्गकषाया लेश्याः संगुणिता चतुर्गतिषु अविरुद्धा।
द्वादश द्वासप्ततिः तावन्मात्रं च अष्टचत्वारिंशत्॥828॥)

णवरि विसेसं जाणे सुर मिस्से अविरदे य सुहलेस्सा।
चदुवीस तत्थ भंगा असहायपरक्कमुद्दिट्ठा॥829॥
(नवरि विशेषं जानीहि सुरे मिश्रे अविरते च शुभलेश्याः।
चतुर्विंशं तत्र भङ्गा असहायपराक्रमोद्दिष्टाः॥829॥)

चक्खूण मिच्छसासणसम्मा तेरिच्छगा हवंति सदा।
चारिकसायतिलेस्साणब्भासे तत्थ भंगा हु॥830॥
(चक्षुरूनं मिथ्यसासनसम्यञ्चः तैरश्चिका भवन्ति सदा।
चतुःकषायत्रिलेश्यानामभ्यासे तत्र भङ्गा हि॥830॥)

खाइयअविरदसम्मे चउ सोल बिहत्तरी य बारं च।
तद्देसो मणुसेव य छत्तीसा तब्भवा भंगा॥831॥
(क्षायिकाविरतसम्ये चत्वारः षोडश द्वासप्ततिश्च द्वादश च।
तद्देशो मनुष्य एव च षट्त्रिंशत् तद्भवा भङ्गाः॥831॥)

परिणामो दुट्ठाणो मिच्छे सेसेसु एक्कठाणो दु।

सम्मे अण्णं सम्मं चारित्ते णत्थि चारित्तं॥832॥

(परिणामो द्विस्थानो मिथ्ये शेषेषु एकस्थानस्तु।

सम्ये अन्यत्सम्यं चारित्रे नास्ति चारित्रम्॥832॥)

मिच्छदुगयदचउक्के अट्ठट्ठाणेण खयियठाणेण।

जुद परजोगजभंगा पुध आणिय मेलिदव्वा हु॥833॥

(मिथ्यद्विकायतचतुष्के अष्टस्थानेन क्षायिकस्थानेन।

युतं परयोगजभङ्गा पृथगानीय मेलयितव्या हि॥833॥)

उदयेणक्खे चढिदे गुणगारा एव होंति सव्वत्थ।

अवसेसभावठाणेणक्खे संचारिदे खेवा॥834॥

(उदयेनाक्षे चटिते गुणकारा एव भवन्ति सर्वत्र।

अवशेषभावस्थानेनाक्षे संचारिते क्षेपाः॥834॥)

दुसु दुसु देसे दोसुवि चउरुत्तर दुसदगसिदिसहिदसदं।

बावत्तरि छत्तीसा बारमपुव्वे गुणिज्जपमा॥835॥

बारचउतिदुगमेक्कं थूले तो इगि हवे अजोगित्ति।

पुण बार बार सुण्णं चउसद छत्तीस देसोत्ति॥836॥ जुम्मं।

(द्वयोः द्वयोः देशे द्वयोरपि चतुरुत्तरद्विशतकमशीतिसहितशतम्।

द्वासप्ततिः षट्त्रिंशत् द्वादश अपूर्वे गुण्यप्रमा॥835॥

द्वादशचतुस्त्रिद्विकैकं स्थूले अतः एको भवेत् अयोगीति।

पुनः द्वादश द्वादश शून्यं चतुःशतं षट्त्रिंशत् देश इति॥836॥

युग्मम्।)

वामे दुसु दुसु दुसु तिसु खीणे दोसुवि कमेण गुणगारा।

णव छब्बारस तीसं वीसं वीसं चउक्कं च॥837॥

(वामे द्वयोः द्वयोः द्वयोः त्रिषु क्षीणे द्वयोरपि क्रमेण गुणकाराः।

नव षट् द्वादश त्रिंशं विंशं विंशं चतुष्कं च॥837॥)

पुणरवि देसोत्ति गुणो तिदुणभछछक्कयं पुणो खेवा।

पुव्वपदे अड पंचयमेगारमुगुतीसमुगुवीसं॥838॥

(पुनरपि देश इति गुणः त्रिद्विनभःषट्षट्कं पुनः क्षेपाः।

पूर्वपदे अष्ट पञ्चकमेकादश एकोनत्रिंशमेकोनविंशम्॥838॥)

उगुवीस तियं तत्तो तिदुणभछछक्कयं च देसोत्ति।

चउसुवसमगेसु गुणा तालं रुऊणया खेवा॥839॥

(एकोनविंशं त्रयः ततः त्रिद्विनभःषट्षट्कं च देश इति।

चतुर्षूपशामकेषु गुणाः चत्वारिंशत् रूपोनाः क्षेपाः॥839॥)

मिच्छादिठाणभंगा अट्ठारसया हवंति तेसीदा।

बारसया पणवण्णा सहस्ससहिया हु पणसीदा॥840॥

(मिथ्यादिस्थानभङ्गा अष्टादशशतं भवन्ति त्र्यशीतिः।

द्वादशशतं पञ्चपञ्चाशत् सहस्रसहिता हि पञ्चाशीतिः॥840॥)

रूवहियडवीससया सगणउदा दससया णवेणहिया।

एक्कारसया दोण्हं खवगेसु जहाकमं वोच्छं॥841॥

(रूपाधिकाष्टविंशशतानि सप्तनवतिः दशशतानि नवेनाधिकाः।

एकादशशतानि द्वयोः क्षपकेषु यथाक्रमं वक्ष्यामि॥841॥)

पुव्वंपंचणियट्टीसुहुमे खीणे दहाण छव्वीसा।

तत्तियमेत्तो दसअडछच्चदुचदुचदुय एगूणं॥842॥

(अपूर्वपञ्चानिवृत्तिसूक्ष्मे क्षीणे दशानां षड्विंशतिः।

तावन्मात्रा दशाष्टषट्चतुश्चतुश्चतुष्कमेकोनम्॥842॥)

उवसामगेसु दुगुणं रूवहियं होदि सत्त जोगिम्हि।

सत्तेव अजोगिम्मि य सिद्धे तिण्णेव भंगा हु॥843॥

(उपशामकेषु द्विगुणं रूपाधिकं भवति सप्त योगिनि।

सप्तैव अयोगिनि सिद्धे त्रय एव भङ्गा हि॥843॥)

दुविहा पुण पदभंगा जादिगपदसव्वपदभवात्ति हवे।

जातिपदखइगमिस्से पिंडेव य होदि सगजोगो॥844॥

(द्विविधाः पुनः पदभङ्गा जातिगपदसर्वपदभवा इति भवेत्।

जातिपदक्षायिकमिश्रे पिण्डे एव च भवति स्वकयोगः॥844॥)

अयदुवसमगचउक्के एक्कं दो उवसमस्स जादिपदो।

खइगपदं तत्थेक्कं खवके जिणसिद्धगेसु दु पण चदू॥845॥

(अयतौपशमिकचतुष्के एकं द्वे उपशमस्य जातिपदम्।

क्षायिकपदं तत्रैकं क्षपके जिनसिद्धकेषु द्वे पञ्च चत्वारि॥845॥)

मिच्छतिये मिस्सपदा तिण्णि य अयदम्मि होंति चत्तारि।

देसतिये पंचपदा तत्तो खीणोत्ति तिण्णिपदा॥846॥

(मिथ्यत्रये मिश्रपदानि त्रीणि च अयते भवन्ति चत्वारि।

देशत्रये पञ्चपदानि ततः क्षोण इति त्रिपदानि॥846॥)

मिच्छे अट्ठुदयपदा ते तिसु सत्तेव तो सवेदोत्ति।

छस्सुहुमोत्ति य पणगं खीणोत्ति जिणेसु चदुतिदुगं॥847॥

(मिथ्ये अष्टोदयपदानि तानि त्रिषु सप्तैवातः सवेद इति।

षट् सूक्ष्म इति च पञ्चकं क्षीण इति जिनेषु चतुस्त्रिद्विकम्॥847॥)

मिच्छे परिणामपदा दोण्णि य सेसेसु होदि एक्कं तु।

जातिपदं पडि वोच्छं मिच्छादिसु भंगपिंडं तु॥848॥

(मिथ्ये परिणामपदे द्वे च शेषेषु भवति एकं तु।

जातिपदं प्रति वक्ष्यामि मिथ्यादिषु भङ्गपिण्डं तु॥848॥)

अट्ठ गुणिज्जा वामे तिसु सग छच्चउसु छक्क पणगं च।

थूले सुहुमे पणगं दुसु चउतियदुगमदो सुण्णं॥849॥

(अष्ट गुण्यानि वामे त्रिषु सप्त षट् चतुर्षु षट्कं पञ्चकं च।

स्थूले सूक्ष्मे पञ्चकं द्वयोः चतुस्त्रिकद्विकमतः शून्यम्॥849॥)

बारट्ठट्ठछवीसं तिसु तिसु बत्तीसयं च चउवीसं।

तो तालं चउवीसं गुणगारा बार बार णभं॥850॥

(द्वादशाष्टाष्टषड्विंशं त्रिषु त्रिषु द्वात्रिंशत्कं च चतुर्विंशम्।

अतः चत्वारिंशत् चतुर्विंशं गुणकारा द्वादश द्वादश नभः॥850॥)

वामे चउदस दुसु दस अडवीसं तिसु हवंति चोत्तीसं।

तिसु छव्वीस दुदालं खेवा छव्वीस बार बार णवं॥851॥

(वामे चतुर्दश द्वयोः दश अष्टविंशं त्रिषु भवन्ति चतुस्त्रिंशत्।

त्रिषु षड्विंशं द्विचत्वारिंशत् क्षेपाः षड्विंशं द्वादश द्वादश

नव॥851॥)

एक्कारं दसगुणियं दुसु छावट्ठी दसाहियं विसयं।

तिसु छव्वीसं बिसयं वेदुवसामोत्ति दुसय बासीदी॥852॥

बादालं बेण्णिसया तत्तो सुहुमोत्ति दुसय दोसहियं।

उवसंतम्मि य भंगा खवगेसु जहाकमं वोच्छं॥853॥ जुम्मं।

(एकादश दशगुणितं द्वयोः षट्षष्टिः दशाधिकं द्विशतम्।

त्रिषु षड्विंशं द्विशतं वेदोपशम इति द्विशतं व्यशीतिः॥852॥

द्वाचत्वारिंशद्द्विशतं ततः सूक्ष्म इति द्विशतं द्विसहितम्।

उपशान्ते च भङ्गाः क्षपकेषु यथाक्रमं वक्ष्यामि॥853॥ युग्मम्।)

सत्तरसं दसगुणिदं वेदित्ति सयाहियं तु छादालं।

सुहुमोत्ति खीणमोहे बावीससयं हवे भंगा॥854॥

अडदालं छत्तीसं जिणेसु सिद्धेसु होंति णव भंगा।

एत्तो सव्वपदं पडि मिच्छादिसु सुणह वोच्छामि॥855॥ जुम्मं।

(सप्तदश दशगुणितं वेद इति शताधिकं तु षट्चत्वारिंशत्।

सूक्ष्म इति क्षीणमोहे द्वाविंशशतं भवेयुः भङ्गाः॥854॥

अष्टचत्वारिंशत् षट्त्रिंशत् जिनेषु सिद्धेषु भवन्ति नव भङ्गाः।

एतस्मात्सर्वपदं प्रति मिथ्यादिषु शृणुत वक्ष्यामि॥855॥ युग्मम्।)

भव्विदराणण्णदरं गदीण लिंगाण कोहपहुदीणं।

इगिसमये लेस्साणं सम्मत्ताणं च णियमेण॥856॥

(भव्येतरयोरन्यतरत् गतीनां लिङ्गानां क्रोधप्रभृतिनाम्।

एकसमये लेश्यानां सम्यक्त्वानां च नियमेन॥856॥)

पत्तेयपदा मिच्छे पण्णरसा पंच चेव उवजोगा।

दाणादी ओदयिये चत्तारि य जीवभावो य॥857॥

(प्रत्येकपदानि मिथ्ये पञ्चदश पञ्च चैव उपयोगाः।

दानादयः औदयिके चत्वारि च जीवभावश्च॥857॥)

पिंडपदा पंचेव य भव्विदरदुगं गदी य लिंगं च।

कोहादी लेस्सावि य इदि वीसपदा हु उड्ढेण॥858॥

(पिण्डपदानि पञ्चैव च भव्येतरद्विकं गतिश्च लिङ्गं च।

क्रोधादयः लेश्या अपि च इति विंशपदानि हि वृद्ध्या॥858॥)

पत्तेयाणं उवरिं भव्विदरदुगस्स होदि गदि लिंगे।

कोहादिलेस्ससम्मत्ताणं रयणा तिरिच्छेण॥859॥

(प्रत्येकानामुपरि भव्येतरद्विकस्य भवति गतिलिङ्गयोः।

क्रोधादिलेश्यासम्यक्त्वानां रचना तिरश्चा॥859॥)

एक्कादी दुगुणकमा एक्केक्कं रुंधिऊण हेट्ठम्मि।

पदसंजोगे भंगा गच्छं पडि होंति ऊवरुवरिं॥860॥

(एकादि द्विगुणक्रमादेकैकं रुद्ध्वा अधस्तने।

पदसंयोगे भङ्गा गच्छं प्रति भवन्ति उपर्युपरि॥860॥)

इट्ठपदे रुऊणे दुगसंवग्गम्मि होदि इट्ठधणं।

असरित्थाणंतधणं दुगुणेगूणे सगीयसव्वधणं॥861॥

(इष्टपदे रूपोने द्विकसंवर्गे भवति इष्टधनम्।

असदृशानामन्तधनं द्विगुणे एकोने स्वकीयसर्वधनम्॥861॥)

तेरिच्छा हु सरित्था अविरददेसाण खयियसम्मत्तं।

मोत्तूण संभवं पडि खयिगस्सवि आणए भंगे॥862॥

(तिर्यञ्चि हि सदृशानि अविरतदेशयोः क्षायिकसम्यक्त्वम्।

मुक्त्वा संभवं प्रति क्षायिकस्यापि आनयेत् भङ्गान्॥862॥)

उड्ढतिरिच्छपदाणं दव्वसमासेण होदि सव्वधणं।

सव्वपदाणं भंगे मिच्छादिगुणेसु णियमेण॥863॥

(ऊर्ध्वतिर्यक्पदानां द्रव्यसमासेन भवति सर्वधनम्।

सर्वपदानां भंगे मिथ्यादिगुणेषु नियमेन॥863॥)

मिच्छादीणं दुति दुसु अपुव्वअणियट्टिखवगसमगेसु।

सुहुमुवसमगे संते सेसे पत्तेयपदसंखा॥864॥

पण्णर सोलट्ठारस वीसुगुवीसं च वीसमुगुवीसं।

इगिवीस वीसचउदसतेरसपणगं जहाकमसो॥865॥ जुम्मं।

(मिथ्यादीनां द्वित्रिषु द्वयोः अपूर्वानिवृत्तिक्षपकोपशमकेषु।

सूक्ष्मोपशमके शान्ते शेषे प्रत्येकपदसंख्या॥864॥

पञ्चदश शोडशाष्टादश विंशैकोनविंशं च विंशमेकोनविंशम्।

एकविंशं विंशचतुर्दशत्रयोदशपञ्चकं यथाक्रमशः॥865॥ युग्मम्।)

मिच्छाइट्ठिप्पहुदिं खीणकसाओत्ति सव्वपदभंगा।

पण्णट्ठिं च सहस्सा पंचसया होंति छत्तीसा॥866॥

(मिथ्यादृष्टिप्रभृति क्षीणकषाय इति सर्वपदभङ्गाः।

पञ्चषष्ठिः च सहस्राणि पञ्चशतानि भवन्ति षट्त्रिंशत्॥866॥)

तग्गुणगारा कमसो पणणउदेयत्तरीसयाण दलं।

ऊणट्ठारसयाणं दलं तु सत्तहियसोलसयं॥867॥

(तद्गुणकाराः क्रमशः पञ्चनवत्येकसप्ततिशतानां दलम्।

एकोनमष्टादशशतानां दलं तु सप्ताधिकषोडशशतम्॥867॥)

तेवत्तरिं सयाइं सत्तावट्ठी य अविरदे सम्मे।

सोलस चेव सयाइं चउसट्ठी खयियसम्मस्स॥868॥

(त्रिसप्ततिशतानि सप्तषष्ठिश्च अविरते सम्ये।

षोडश चैव शतानि चतुःषष्ठिः क्षायिकसम्यस्य॥868॥)

ऊणत्तीससयाइं एक्काणउदी य देसविरदम्मि।

छावत्तरि पंचसया खइयणरे णत्थि तिरियम्मि॥869॥

(एकोनत्रिंशच्छतानि एकनवतिश्च देशविरते।

षट्सप्ततिः पञ्चशतानि क्षायिकनरे नास्ति तिरश्चि॥869॥)

इगिदालं च सयाइं चउदालं च य पमत्त इदरे य।

पुव्वुवसमगे वेदाणियट्टिभागे सहस्समट्ठूणं ॥870॥

(एकचत्वारिंशच्च शतानि चतुश्चत्वारिंशच्च च प्रमत्ते इतरस्मिंश्च।

अपूर्वोपशमके वेदानिवृत्तिभागे सहस्रमष्टोनम्॥870॥)

अडसट्ठी एक्कसयं कसायभागम्मि सुहुमगे संते।

अडदालं चउवीसं खवगेसु जहाकमं वोच्छं॥871॥

(अष्टषष्टिः एकशतं कषायभागे सूक्ष्मके शान्ते।

अष्टचत्वारिंशत् चतुर्विंशं क्षपकेषु यथाक्रमं वक्ष्यामि॥871॥)

अडदालं चारिसयापुव्वे अणियट्टिवेदभागे य।

सीदी कसायभागे तत्तो बत्तीस सोलं तु॥872॥

(अष्टचत्वारिंशत् चतुःशतान्यपूर्वे अनिवृत्तिवेदभागे च।

अशीतिः कषायभागे ततो द्वात्रिंशत् षोडश तु॥872॥)

जोगिम्मि अजोग्गिम्मि य बेसदछप्पण्णयाण गुणगारा।

चउसट्ठी बत्तीसा गुणगुणिदेक्कूणया सव्वे॥873॥

(योगिनि अयोगिन च द्विशतषट्पञ्चाशतां गुणकाराः।

चतुःषष्टिः द्वात्रिंशत् गुण्यगुणिते एकोनकाः सर्वे॥873॥)

सिद्धेसु सुद्धभंगा एक्कत्तीसा हवंति णियमेण।

सव्वपदं पडि भंगा असहायपरक्कमुद्दिट्ठा॥874॥

(सिद्धेषु शुद्धभङ्गा एकत्रिंशत् भवन्ति नियमेन।

सर्वपदं प्रति भङ्गा असहायपराक्रमोद्दिष्टाः॥874॥)

आदेसेवि य एवं संभवभावेहिं ठाणभंगाणि।

पदभंगाणि य कमसो अव्वामोहेण आणेज्जो॥875॥

(आदेशेपि च एवं संभवभावैः स्थानभङ्गाः।

पदभङ्गाश्च क्रमशः अव्यामोहेन आनेयाः॥875॥)

असिदिसदं किरियाणं अक्किरियाणं च आहु चुलसीदी।

सत्तट्ठण्णाणीणं वेणयियाणं तु बत्तीसं॥876॥

(अशीतिशतं क्रियानामक्रियाणां चाहुः चतुरशीतिः।

सप्तषष्ठिरज्ञानिनां वैनयिकानां तु द्वात्रिंशत् ॥876॥)

अत्थि सदो परदोवि य णिच्चाणिच्चत्तणेण य णवत्था।

कालीसरप्पणियदिसहावेहिं य ते हि भंगा हु॥877॥

(अस्ति स्वतः परतोपि च नित्यानित्यत्वेन च नवार्थाः।

कालेश्वरात्मनियतिस्वभावैश्च ते हि भङ्गा हि ॥877॥)

अत्थि सदो परदोवि य णिच्चाणिच्चत्तणेण य णवत्था।

एसिं अत्था सुगमा कालादीणं तु वोच्छामि॥878॥

(अस्ति स्वतः परतोपि च नित्यानित्यत्वेन च नवार्थाः।

एषामर्थाः सुगमाः कालादीनां तु वक्ष्यामि॥878॥)

कालो सव्वं जणयदि कालो सव्वं विणस्सदे भूदं।

जागत्ति हि सुत्तेसुवि ण सक्कदे वंचिदुं कालो॥879॥

(कालः सर्वं जनयति कालः सर्वं विनाशयति भूतम्।

जागर्ति हि सुप्तेष्वपि न शक्यते वञ्चितुं कालः॥879॥)

अण्णाणी हु अणीसो अप्पा तस्स य सुहं च दुक्खं च।

सग्गं णिरयं गमणं सव्वं ईसरकयं होदि॥880॥

(अज्ञानी हि अनीश आत्मा तस्य च सुखं च दुःखं च।

स्वर्गं निरयं गमनं सर्वमीश्वरकृतं भवति॥880॥)

एक्को चेव महप्पा पुरिसो देवो य सव्ववावी य।

सव्वंगणिगूढोवि य सचेयणो णिग्गुणो परमो॥881॥

(एकश्चैव महात्मा पुरुषो देवश्च सर्वव्यापी च।

सर्वाङ्गनिगूढोपि च सचेतनो निर्गुणः परमः॥881॥)

जत्तु जदा जेण जहा जस्स य णियमेण होदि तत्तु तदा।

तेण तहा तस्स हवे इदि वादो णियदिवादो दु॥882॥

(यत्तु यदा येन यथा यस्य च नियमेन भवति तत्तु तदा।

तेन तथा तस्य भवेदिति वादो नियतिवादस्तु॥882॥)

को करइ कंटयाणं तिक्खत्तं मियविहंगमादीणं।

विविहत्तं तु सहाओ इदि सव्वंपि य सहाओत्ति॥883॥

(कः करोति कण्टकानां तीक्ष्णत्वं मृगविहङ्गमादीनाम्।

विविधत्वं तु स्वभाव इति सर्वमपि च स्वभाव इति॥883॥)

णत्थि सदो परदोवि य सत्तपयत्था य पुण्णपाऊणा।

कालादियादिभंगा सत्तरि चदुपंतिसंजादा॥884।

(नास्ति स्वतः परतोपि च सप्तपदार्थाश्च पुण्यपापोनाः।

कालादिकादिभङ्गाः सप्ततिः चतुःपङ्क्तिसंजाताः॥884।)

णत्थि य सत्तपदत्था णियदीदो कालदो तिपंतिभवा।

चोद्दस इदि णत्थित्ते अक्किरियाणं च चुलसीदी॥885॥

(नास्ति च सप्तपदार्था नियतितः कालतः त्रिपङ्क्तिभवाः।

चतुर्दश इति नास्तित्वे अक्रियाणां च चतुरशीतिः॥885॥)

को जाणइ णवभावे सत्तमसत्तं दयं अवच्चमिदि।

अवयणजुद सत्ततयं इदि भंगा होंति तेसट्ठी॥886॥

(को जानाति नवभावेषु सत्त्वमसत्त्वं द्वयमवाच्यमिति।

अवचनयुतं सप्ततयमिति भङ्गा भवन्ति त्रिषष्टिः॥886॥)

को जाणइ सत्तचऊ भावं सुद्धं खु दोण्णिपंतिभवा।

चत्तारि होंति एवं अण्णाणीणं तु सत्तट्ठी॥887॥

(को जानाति सत्त्वचतुष्कं भावं शुद्धं खलु द्विपंङ्क्तिभवाः।

चत्वारो भवन्ति एवमज्ञानिनां तु सप्तषष्टिः॥887॥)

मणवयणकायदाणगविणवो सुरणिवइणाणिजदिवुड्ढे।

बाले मादुपिदुम्मि च कायव्वी चेदि अट्ठचऊ॥888॥

(मनोवचनकायदानगविनयः सुरनृपतिज्ञानियतिवृद्धे।

बाले मातृपित्रोश्च कर्तव्यः चेति अष्टचतुष्कम्॥888॥)

सच्छंददिट्ठीहिं वियप्पियाणि तेसट्ठिजुत्ताणि सयाणि तिण्णि।

पाखंडिणं वाउलकारणाणि अण्णाणिचित्ताणि हरंति ताणि॥889॥

(स्वच्छन्दद्दष्टिभिः विकल्पितानि त्रिषष्ठियुक्तानि शतानि त्रीणि।

पाखण्डिनां व्याकुलकारणानि अज्ञानिचित्तानि हरन्ति तानि॥889॥)

आलसड्ढो णिरुच्छाहो फलं किंचिं ण भुंजदे।

थणक्खीरादिपाणं वा पउरुसेण विणा ण हि॥890॥

(आलस्याढ्यो निरुत्साहः फलं किञ्चिन्न भुङ्क्ते।

स्तनक्षीरादिपानं वा पौरुषेण विना न हि॥890॥)

दइवमेव परं मण्णे धिप्पउरुसमणत्थयं।

एसो सालसमुत्तुंगो कण्णो हण्णइ संगरे॥891॥

(दैवमेव परं मन्ये धिक् पौरुषमनर्थकम्।

एष सालसमुत्तुङ्गः कर्णो हन्यते संगरे॥891॥)

संजोगमेवेति वदंति तण्णा णेवेक्कचक्केण रहो पयादि।

अंधो य पंगू य वणं पविट्ठा ते संपजुत्ता णयरं पविट्ठा॥892॥

(संयोगमेवेति वदन्ति तज्ज्ञा नैवैकचक्रेण रथः प्रयाति।

अन्धश्च पङ्गुश्च वनं प्रविष्टौ संप्रयुक्तौ नगरप्रविष्टौ॥892॥)

सइउट्ठिया पसिद्धी दुव्वारा मेलिदेहिंवि सुरेहिं।

मज्झिमपंडवखित्ता माला पंचसुवि खित्तेव॥893॥

(सकृदुत्थिता प्रसिद्धिः दुर्वारा मिलितैरपि सुरैः।

मध्यमपाण्डवक्षिप्ता माला पञ्चस्वपि क्षिप्तेव॥893॥)

जावदिया वयणवहा तावदिया चेव होंति णयवादा।

जावदिया णयवादा तावदिया चेव होंति परसमया॥894॥

(यावन्तो वचनपथाः तावन्तश्चैव भवन्ति नयवादाः।

यावन्तो नयवादास्तावन्तश्चैव भवन्ति परसमयाः॥894॥)

परसमयाणं वयणं मिच्छं खलु होइ सव्वहा वयणा।

जेणाणं पुण वयणं सम्मं खु कहंचिवयणादो॥895॥

(परसमयानां वचनं मिथ्या खलु भवति सर्वथावचनात्।

जैनानां पुनः वचनं सम्यक्खलु कथंचिद्वचनात्॥895॥)

8- त्रिकरणचूलिकाधिकार

णमह गुणरयणभूसण सिद्धंतामियमहद्धिभवभावं।

वरवीरणंदिचंदं णिम्मलगुणमिंदणंदिगुरुं॥896॥

(नमत गुणरत्नभूषण सिद्धान्तामृतमहाब्धिभवभावम्।

वरनीरनन्दिचन्द्रं निर्मलगुणमिन्द्रनन्द्रिगुरुम्॥896॥)

इगिवीसमोहखवणुवसमणणिमित्ताणि तिकरणाणि तहिं।

पढमं अधापवत्तं करणं तु करेदि अपमत्तो॥897॥

(एकविंशतिमोहक्षपणोपशमननिमित्तानि त्रिकरणानि तस्मिन्।

प्रथममधःप्रवृत्तं करणं तु करोति अप्रमत्तः॥897॥)

जम्हा उवरिमभावा हेट्ठिमभावेहिं सरिसगा होंति।

तम्हा पढमं करणं अधापवत्तोत्ति णिद्दिट्ठं॥898॥

(यस्मादुपरितनभावा अधस्तनभावैः सदृशका भवन्ति।

तस्मात् प्रथमं करणमधःप्रवृत्तमिति निर्दिष्टम्॥898॥)

अंतोमुहुत्तमेत्तो तक्कालो होदि तत्थ परिणामा।

लोगाणमसंखपमा उवरुवरिं सरिसवड्ढिगया॥899॥

(अन्तर्मुहूर्तमात्रः तत्कालो भवति तत्र परिणामाः।

लोकानासंख्यप्रमा उपर्युपरि सदृशवृद्धिगताः॥899॥)

बावत्तरितिसहस्सा सोलस चउ चारि एक्कयं चेव।

धणअद्धाणविसेसे तियसंखा होइ संखेज्जे॥900॥

(द्वासप्ततित्रिसहस्राणि षोडश चतुष्कं चत्वारि एकं चैव।

धनाध्वानविशेषाः त्रयसंख्या भवति संख्येये॥900॥)

आदिधणादो सव्वं पचयधणं संखभागपरिमाणं।

करणे अधापवत्ते होदित्ति जिणेहिं णिद्दिट्ठं॥901॥

(आदिधनात्सर्वं प्रचयधनं संख्यभागपरिमाणम्।

करणे अधःप्रवृत्ते भवतीति जिनैर्निर्दिष्टम्॥901॥)

उभयधणे संमिलिदे पदकदिगुणसंखरूवहदपचयं।

सव्वधणं तं तम्हा पदकदिसंखेण भाजिदे पचयं॥902॥

(उभयधने संमिलिते पदकृतिगुणसंख्यरूपहतप्रचयः।

सर्वधनं ततस्मात् पदकृतिसंख्येन भाजिते प्रचयम्॥902॥)

चयधणहीणं दव्वं पदभजिदे होदि आदिपरिमाणं।

आदिम्मि चये उड्ढे पडिसमयधणं तु भावाणं॥903॥

(चयधनहीनं द्रव्यं पदभक्ते भवति आदिपरिमाणम्।

आदौ चये वृद्धे प्रतिसमयधनं तु भावानाम्॥903॥)

पचयधणस्साणयणे पचयं पभवं तु पचयमेव हवे।

रूऊणपदं तु पदं सव्वत्थवि होदि णियमेण॥904॥

(प्रचयधनस्यानयने प्रचयः प्रभवस्तु प्रचय एव भवेत्।

रूपोनपदं तु पदं सर्वत्रापि भवति नियमेन॥904॥)

पडिसमयधणेवि पदं पचयं पभवं च होइ तेरिच्छे।

अणुकट्टिपदं सव्वद्धाणस्स य संखभावो हु॥905॥

(प्रतिसमयधनेपि पदं प्रचयः प्रभवश्च भवति तिरश्चि।

अनुकृष्टिपदं सर्वाध्वानस्य च संख्यभागो हि॥905॥)

अणुकट्टिपदेण हदे पचये पचयो दु होइ तेरिच्छे।

पचयधणूणं दव्वं सगपदभजिदं हवे आदि॥906॥

(अनुकृष्टिपदेन हते प्रचये प्रचयस्तु भवति तिरश्चि।

प्रचयधनोनं द्रव्यं स्वकपदभाजितं भवेदादिः॥906॥)

आदिम्मि कमे वड्ढदि अणुकट्टिस्स य चयं तु तेरिच्छे।

इदि उड्ढतिरियरयणा अधापवत्तम्मि करणम्मि॥907॥

(आदौ क्रमेण वर्धते अनुकृष्टेः च चयस्तु तिरश्चि।

इति ऊर्ध्वतिर्यग्रचना अधःप्रवृत्ते करणे॥907॥)

अंतोमुहुत्तकालं गमिऊण अधापवत्तकरणं तु।

पडिसमयं सुज्झंता अपुव्वकरणं समल्लियइ॥908॥

(अन्तर्मुहूर्तकालं गमयित्वा अधःप्रवृत्तकरणं तु।

प्रतिसमयं शुद्धय्न्नपूर्वकरणं समाश्रयति॥908॥)

छण्णउदिचउसहस्सा अट्ठ य सोलस धणं तदद्धाणं।

परिणामविसेसोवि य चउ संखापुव्वकरणसंदिट्ठी॥909॥

(षण्णवतिचतुःसहस्री अष्टौ च षोडश धनं तदध्वानः।

परिणामविशेषोपि च चत्वारि संख्यातान्यपूर्वकरणसंदृष्टिः॥909॥)

अंतोमुहुत्तमेत्ते पडिसमयमसंखलोगपरिणामा।

कमउड्ढापुव्वगुणे अणुकट्टी णत्थि णियमेण॥910॥

(अन्तर्मुहूर्तमात्रे प्रतिसमयमसंख्यलोकपरिणामाः।

क्रमवृद्धाः अपूर्वगुणे अनुकृष्टिर्नास्ति नियमेन॥910॥)

एकम्हि कालसमये संठाणादीहिं जह णिवट्टंति।

ण णिवट्टंति तहंवि य परिणामेहिं मिहो जे हु॥911॥

होंति अणियट्टिणो ते पडिसमयं जस्सिमेक्कपरिणामो।

विमलयरझाणहुदवहसिहाहिं णिद्दड्ढकम्मवणा॥912॥ जुम्मं॥

(एकस्मिन् कालसमये संस्थानादिभिर्यथा निवर्तन्ते।

न निवर्तन्ते तथापि च परिणामैर्मिथो ये हि॥911॥

भवन्ति अनिवर्तिनस्ते प्रतिसमयं येषामेकपरिणामः।

विमलतरध्यानहुतवहशिखाभिर्निर्दग्धकर्मवनाः॥912॥ युग्मम्।)

9- कर्मस्थितिरचनाधिकार

सिद्धे विसुद्धणिलये पणट्ठकम्मे विणट्ठसंसारे।

पणमिय सिरसा वोच्छं कम्मट्ठिदिरयणसब्भावं॥913॥

(सिद्धान् विशुद्धनिलयान् प्रणष्टकर्मणः विनष्टसंसारान्।

प्रणम्य शिरसा वक्ष्यामि कर्मस्थितिरचनासद्भावम्॥913॥)

कम्मसरूवंणागयदव्वे ण य एदि उदयरूवेण।

रूवेणुदीरणस्स य आवाहा जाव ताव हवे॥914॥

(कर्मस्वरूपेणागतद्रव्यं न च एति उदयरूपेण।

रूपेणोदीरणाया वा आबाधा यावत्तावद्भवेत्॥914॥)

उदयं पडि सत्तण्हं आबाहा कोडिकोडि उवहीणं।

वाससयं तप्पडिभागेण य सेसट्ठिदीणं च॥915॥

(उदयं प्रति सप्तानामाबाधा कोटीकोटिः उदधीनाम्।

वर्षशतं तत्प्रतिभागेन च शेषस्थितीनां च॥915॥)

अंतोकोडाकोडीठिदिस्स अंतोमुहुत्तमावाहा।

संखेज्जगुणविहीणं सव्वजहण्णट्ठिदिस्स हवे॥916॥

(अन्तःकोटीकोटिस्थितेः अन्तर्मुहूर्त आबाधा।

संख्यातगुणविहीनः सर्वजघन्यस्थितेः भवेत्॥916॥)

पुव्वाणं कोडितिभागादासंखेवअद्धओत्ति हवे।

आउस्स य आवाहा णट्ठिदिपडिभागमाउस्स॥917॥

(पूर्वाणां कोटित्रिभागादासंक्षेपाद्धा वा इति भवेत्।

आयुषश्च आबाधा न स्थितिप्रतिभाग आयुषः॥917॥)

आवलियं आवाहा उदीरणमासिज्ज सत्तकम्माणं।

परभवियआउगस्स य उदीरणा णत्थि णियमेण॥918॥

(आवलिकमाबाधा उदीरणामाश्रित्य सप्तकर्मणाम्।

परभवीयायुष्कस्य च उदीरणा नास्ति नियमेन॥918॥)

आवाहूणियकम्मट्ठिदीणिसेगो दु सत्तकम्माणं।

आउस्स णिसेगो पुण सगट्ठिदी होदि णियमेण॥919॥

(आबाधोनितकर्मस्थितिः निषेकस्तु सप्तकर्मणाम्।

आयुषः निषेकः पुनः स्वकस्थितिः भवति नियमेन॥919॥)

आवाहं वोलाविय पढमणिसेगम्मि देय बहुगं तु।

तत्तो विसेसहीणं बिदियस्सादिमणिसेओत्ति॥920॥

(आबाधां वा अपलाप्य प्रथमनिषेके देयं बहुकं तु।

ततो विशेषहीनं द्वितीयस्यादिमनिषेक इति॥920॥)

बिदिये बिदियणिसेगे हाणी पुव्विल्लहाणिअद्धं तु।

एवं गुणहाणिं पडि हाणी अद्धद्धयं होदि॥921॥

(द्वितीये द्वितीयनिषेके हानिः पूर्वहान्यर्धं तु।

एवं गुणहानिं प्रति हानिः अर्धार्धं भवति॥921॥)

दव्वं ठिदिगुणहाणीणद्धाणं दलसला णिसेयछिदी।

अण्णोण्णगुणसलावि य जाणेज्जो सव्वठिदिरयणे॥922॥

(द्रव्यं स्थितिः गुणहानीनामध्वानं दलशला निषेकच्छतिः।

अन्योन्यगुणशला अपि च ज्ञातव्यं सर्वस्थितिरचनायाम्॥922॥)

तेवट्ठिं च सयाइं अडदाला अट्ठ छक्क सोलसयं।

चउसट्ठिं च विजाणे दव्वादीणं च संदिट्ठी॥923॥

(त्रिषष्टिश्च शतानि अष्टचत्वारिंशदष्ट षट्कं षोडशकम्।

चतुःषष्ठिं च विजानीहि द्रव्यादीनां च संदृष्टिः॥923॥)

दव्वं समयपबद्धं उत्तपमाणं तु होदि तस्सेव।

जीवसहत्थणकालो ठिदिअद्धा संखपल्लमिदा॥924॥

(द्रव्यं समयप्रबद्धं उक्तप्रमाणं तु भवति तस्यैव।

जीवेन सह स्थानकालः स्थित्यद्धा संख्यपल्यमिताः॥924॥)

मिच्छे वग्गसलायप्पहुदिं पल्लस्स पढममूलोत्ति।

वग्गहदी चरिमो तच्छिदिसंकलिदं चउत्थो य॥925॥

(मिथ्ये वर्गशलाकप्रभृति पल्यस्य प्रथममूलमिति।

वर्गहतिः चरमः तच्छितिसंकलितं चतुर्थश्च॥925॥)

वग्गसलायेणवहिदपल्लं अण्णोण्णगुणिदरासी हु।

णाणागुणहाणिसला वग्गसलच्छेदणूणपल्लछिदी॥926॥

(वर्गशलाकयावहितपल्यमन्योन्यगुणितराशिर्हि।

नानागुणहानिशला वर्गशलच्छेदन्यूनपल्यछितिः॥926॥)

सव्वसलायाणं जदि पयदणिसेये लहेज्ज एक्कस्स।

किं होदित्ति णिसेये सलाहिदे होदि गुणहाणी॥927॥

(सर्वशलाकानां यदि प्रकृतनिषेके लभ्यते एकस्य।

किं भवतीति निषेके शलाहिते भवति गुणहानिः॥927॥)

दोगुणहाणिपमाणं णिसेयहारो दु होइ तेण हिदे।

इट्ठे पढमणिसेये विसेसमागच्छदे तत्थ॥928॥

(द्विगुणहानिप्रमाणं निषेकहारस्तु भवति तेन हिते।

इष्टे प्रथमनिषेके विशेष आगच्छति तत्र॥928॥)

रूऊणण्णोण्णब्भत्थवहिददव्वं च चरिमगुणदव्वं।

होदि तदो दुगुणकमो आदिमगुणहाणिदव्वोत्ति॥929॥

(रूपोनान्योन्याभ्यस्तावहितद्रव्यं च चरमगुणद्रव्यम्।

भवति ततो द्विगुणक्रममादिमगुणहानिद्रव्यमिति॥929॥)

रूऊणद्धाणद्धेणूणेण णिसेयभागहारेण।

हदगुणहाणिविभजिदे सगसगदव्वे विसेसा हु॥930॥

(रूपोनाध्वानार्धेनोनेन निषेकभागहारेण।

हतगुणहानिविभाजिते स्वकस्वकद्रव्ये विशेषा हि॥930॥)

पचयस्स य संकलणं सगसगगुणहाणिदव्वमज्झम्हि।

अवणियगुणहाणिहिदे आदिपमाणं तु सव्वत्थ॥931॥

(प्रचयस्य च संकलनं स्वकस्वकगुणहानिद्रव्यमध्ये।

अपनीय गुणहानिहिते आदिप्रमाणं तु सर्वत्र॥931॥)

सव्वासिं पयडीणं णिसेयहारो य एयगुणहाणी।

सरिसा हवंति णाणागुणहाणिसलाउ वोच्छामि॥932॥

(सर्वासां प्रकृतीनां निषेकहारश्च एकगुणहानिः।

सदृशे भवतः नानागुणहानिशला वक्ष्यामि॥932॥)

मिच्छत्तस्स य उत्ता उवरीदो तिण्णि तिण्णि संमिलिदा।

अट्ठगुणेणूणकमा सत्तसु रइदा तिरिच्छेण॥933॥

(मिथ्यात्वस्य च उक्ता उपरितः त्रयः त्रयः संमिलिताः।

अष्टगुणेनोनक्रमाः सप्तसु रचिता तिरश्चा॥933॥)

तत्थंतिमच्छिदिस्स य अट्ठमभागो सलायछेदा हु।

आदिमरासिपमाणं दसकोडाकोडिपडिबद्धे॥934॥

(तत्रान्तिमच्छिते श्चाष्टमभागः शलाकच्छेदा हि।

आदिमराशिप्रमाणं दशकोटीकोटिप्रतिबद्धे॥934॥)

इगिपंतिगदं पुध पुध अप्पिट्ठेण य हदे हवे णियमा।

अप्पिट्ठस्स य पंती णाणागुणहाणिपडिबद्धा॥935॥

(एकपङ्क्तिगतं पृथक् पृथगात्मेष्टेन च हते भवेन्नियमात्।

आत्मेष्टस्य च पङ्क्तयो नानागुणहानिप्रतिबद्धाः॥935॥)

अप्पिट्ठपंतिचरिमो जेत्तियमेत्ताण वग्गमूलाणं।

छिदिणिवहोत्ति णिहाणिय सेसं च य मेलिदे इट्ठा॥936॥

(आत्मेष्टपङ्क्तिचरमः यावन्मात्राणां वर्गमूलानाम्।

छितिनिवह इति निर्धार्य शेषं च च मेलिते इष्टा॥936॥)

इट्ठसलायपमाणे दुगसंवग्गे कदे दु इट्ठस्स।

पयडिस्स य अण्णोण्णभत्थपमाणं हवे णियमा॥937॥

(इष्टशलाकाप्रमाणे द्विकसंवर्गे कृते तु इष्टस्य।

प्रकृतेश्च अन्योन्याभ्यस्तप्रमाणं भवेन्नियमात्॥937॥)

आवरणवेदणीये विग्घे पल्लस्स बिदियतदियपदं।

णामागोदे बिदियं संखातीदं हवंतित्ति॥938॥

(आवरणवेदनीये विघ्ने पल्यस्य द्वितीयतृतीयपदम्।

नामगोत्रे द्वितीयं संख्यातीतं भवन्तीति॥938॥)

आउस्स य संखेज्जा तप्पडिभागा हवंति णियमेण।

इदि अत्थपदं जाणिय इट्ठठिदिस्साणए मदिमं॥939॥

(आयुषश्च संख्येयाः प्रत्प्रतिभागा भवन्ति नियमेन।

इति अर्थपदं ज्ञात्वा इष्टस्थितेरानयेत् मतिमान्॥939॥)

उक्कस्सट्ठिदिबंधे सयलाबाहा हु सव्वठिदिरयणा।

तक्काले दीसदि तो धोधो बंधट्ठिदीणं च॥940॥

(उत्कृष्टस्थितिबन्धे सकलाबाधा हि सर्वस्थितिरचना।

तत्काले दृश्यते अतः अधोऽधो बन्धस्थितीनां च॥940॥)

आबाधाणं बिदियो तदियो कमसो हि चरमसमयो दु।

पढमो बिदियो तदियो कमसो चरिमो णिसेओ दु॥941॥

(आबाधानां द्वितीयः तृतीयः क्रमशो चरमसमयस्तु।

प्रथमो द्वितीयः तृतीयः क्रमशः चरमो निषेकस्तु॥941॥)

समयपबद्धपमाणं होदि तिरिच्छेण वट्टमाणम्मि।

पडिसमयं बंधुदओ एक्को समयप्पबद्धो दु॥942॥

(समयप्रबद्धप्रमाणं भवति तिरश्चा वर्तमाने।

प्रतिसमयं बन्धोदय एकः समयप्रबद्धस्तु॥942॥)

सत्तं समयपबद्धं दिवड्ढगुणहाणिताडियं ऊणं।

तियकोणसरूवट्ठिददव्वे मिलिदे हवे णियमा॥943॥

(सत्त्वं समयप्रबद्धं द्वर्ध्यर्धगुणहानिताडितमूनम्।

त्रिककोणस्वरूपस्थितद्रव्ये मिलिते भवेन्नियमात्॥943॥)

उवरिमगुणहाणीणं धणमंतिमहीणपढमदलमेत्तं।

पढमे समयपबद्धं ऊणकमेणट्ठिया तिरिया॥944॥

(उपरितनगुणहानीनां धनमन्तिमहीनप्रथमदलमात्रम्।

प्रथमे समयप्रबद्धमूनक्रमेण स्थितं तिरश्चा॥944॥)

अंतोकोडाकोडिट्ठिदित्ति सव्वे णिरंतरट्ठाणा।

उक्कस्सट्ठाणादो सण्णिस्स य होंति णियमेण॥945॥

(अन्तःकोटीकोटिस्थितिरिति सर्वाणि निरन्तरस्थानानि।

उत्कृष्टस्थानात् संज्ञिनश्च भवन्ति नियमेन॥945॥)

संखेज्जसहस्साणिवि सेढीरूढम्मि सांतरा होंति।

सगसगअवरोत्ति हवे उक्कस्सादोदु सेसाणं॥946॥

(संख्येयसहस्राण्यपि श्रेणीरूढे सान्तरा भवन्ति।

स्वकस्वकावर इति भवेदुत्कृष्टात्तु शेषाणाम्॥946॥)

आउट्ठिदिबंधज्झवसाणट्ठाणा असंखलोगमिदा।

णामागोदे सरिसं आवरणदु तदियविग्घे य॥947॥

(आयुःस्थितिबन्धाध्यवसायस्थानानि असंख्यलोकमितानि।

नामगोत्रे सदृशमावरणद्विके तृतीयविघ्ने च॥947॥)

सव्वुवरि मोहणीये असंखगुणिदक्कमा हु गुणगारो।

पल्लासंखेज्जदिमो पयडिसमाहारमासेज्ज॥748॥

(सर्वोपरि मोहनीये असंख्यगुणितक्रमाणि हि गुणकारः।

पल्यासंख्येयिमः प्रकृतिसमाहारमासाद्य॥948॥)

अवरट्ठिदिबंधज्झवसाणट्ठाणा असंखलोगमिदा।

अहियकमा उक्कस्सट्ठिदिपरिणामोत्ति णियमेण॥949॥

(अवरस्थितिबन्धाध्यवसायस्थानानि असंख्यलोकमितानि।

अधिकक्रमाणि उत्कृष्टस्थितिपरिणाम इति नियमेन॥949॥)

अहियागमणणिमित्तं गुणहाणी होदि भागहारो दु।

दुगुणं दुगुणं वड्ढी गुणहाणिं पडि कमेण हवे॥950॥

(अधिकागमननिमित्तं गुणहानिः भवति भागहारस्तु।

द्विगुणा द्विगुणा वृद्धिः गुणहानिं प्रति क्रमेण भवेत्॥950॥)

ठिदिगुणहाणिपमाणं अज्झवसाणम्मि होदि गुणहाणी।

णाणागुणहाणिसला असंखभागो ठिदिस्स हवे॥951॥

(स्थितिगुणहानिप्रमाणमध्यवसाने भवति गुणहानिः।

नानागुणहानिशला असंख्यभागः स्थितेर्भवेत्॥951॥)

लोगाणमसंखपमा जहण्णठड्ढिम्मि तम्हि छट्ठाणा।

ठिदिबंधज्झवसाणट्ठाणाणं होंति सत्तण्हं॥952॥

(लोकानामसंख्यप्रमाणि जघन्यवृद्धौ तस्मिन् षट्स्थानानि।

स्थितिबन्धाध्यवसायस्थानानां भवन्ति सप्तानाम्॥952॥)

आठस्स जहण्णट्ठिदिबंधणजोग्गा असंखलोगमिदा।

आवलिअसंखभागेणुवरुवरिं होंति गुणिदकमा॥953॥

(आयुषः जघन्यस्थितिबन्धनयोग्यानि असंख्यलोकमितानि।

आवल्यसंख्यभागेनोपर्युपरि भवन्ति गुणितक्रमाणि॥953॥)

पल्लासंखेज्जदिमा अणुकट्ठी तत्तियाणि खंडाणि।

अहियकमाणि तिरिच्छे चरिमं खंडं च अहियं तु॥954॥

(पल्यासंख्येयिमा अनुकृष्टिः तावन्ति खण्डानि।

अधिकक्रमाणि तिरश्चि चरमं खण्डं च अधिकं तु॥954॥)

लोगाणमसंखमिदा अहियपमाणा हवंति पत्तेयं।

समुदायेणवि तच्चिय ण हि अणुकिट्ठिम्मि गुणहाणी॥955॥

(लोकानामसंख्यमितानि अधिकप्रमाणानि भवन्ति प्रत्येकम्।

समुदायेनापि तावत् न हि अनुकृष्टौ गुणहानिः॥955॥)

पढमं पढमं खंडं अण्णोण्णं पेक्खिऊण विसरित्थं।

हेट्ठिल्लुक्कस्सादोऽणंतगुणादुवरिमजहण्णं॥956॥

(प्रथमं प्रथमं खण्डमन्योन्यं प्रेक्ष्य विसदृशम्।

अधस्तनोत्कृष्टादनन्तगुणादुपरितनजघन्यम्॥956॥)

बिदियं बिदियं खंडं अण्णोण्णं पेक्खिऊण विसरित्थं।

हेट्ठिल्लुक्कस्सादोणंतगुणादुवरिमजहण्णं॥957॥

(द्वितीयं द्वितीयं खण्डमन्योन्यं प्रेक्ष्य विसदृशम्।

अधस्तनोत्कृष्टादनन्तगुणादुपरिमजघन्यम्॥957॥)

चरिमं चरिमं खंडं अण्णोण्णं पेक्खिऊण विसरित्थं।

हेट्ठिल्लुक्कस्सादोणंतगुणादुवरिमजहण्णं॥958॥

(चरमं चरमं खण्डमन्योन्यं प्रेक्ष्य विसदृशम्।

अधस्तनोत्कृष्टादनन्तगुणादुपरिमजघन्यम्॥958॥)

हेट्ठिमखंडुक्कस्सं उव्वंकं होदि अवरिमजहण्णं।

अट्ठंकं होदि तदोणंतगुणं उवरिमजहण्णं॥959॥

(अधस्तनखण्डोत्कृष्टमुर्वङ्को भवति उपरिमजघन्यम्।

अष्टाङ्को भवति ततोऽनन्तगुणमुपरिमजघन्यम्॥959॥)

अवरुक्कस्सठिदीणं जहण्णमुक्कस्सयं च णिव्वग्गं।

सेसा सव्वे खंडा खलु होंति उड्ढेण॥960॥

(अवरोत्कृष्टस्थितीनां जघन्यमुत्कृष्टकं च निर्वर्गम्।

शेषाः सर्वे खण्डाः सदृशाः खलु भवन्ति वृद्ध्या॥960॥)

अट्ठण्हंपि य एवं आठजहण्णट्ठिदिस्स वरखंडं।

जावय तावय खंडा अणुकट्टिपदे विसेसहिया॥961॥

तत्तो उवरिमखंडा सगसगउक्कस्सगोत्ति सेसाणं।

सव्वे ठिदियणखंडाऽसंखेज्जगुणक्कमा तिरिये॥962॥ जुम्मं।

(अष्टानामपि च एवमायुर्जघन्यस्थितेः वरखण्डम्।

यावत् तावत् खण्डा अनुकृष्टिपदे विशेषाधिकाः॥961॥

ततः उपरिमखण्डाः स्वकस्वकोत्कृष्टक इति शेषाणाम्।

सर्वे स्थितितनखण्डा असंख्येयगुणक्रमाः तिरश्चि॥962॥ युग्मम्।)

रसबंधज्झवसाणट्ठाणाणि असंखलोगमेत्ताणि।

अवरट्ठिदिस्स अवरट्ठिदिपरिणामम्हि थोवाणि॥963॥

(रसबन्धाध्यवसायस्थानानि असंख्यलोकमात्राणि।

अवरस्थितेरवरस्थितिपरिणामे स्तोकानि॥963॥)

तत्तो कमेण वड्ढदि पडिभागेण य असंखलोगेण।

अवरट्ठिदिस्स जेट्ठट्ठिदिपरिणामोत्ति णियमेण॥964॥

(ततः क्रमेण वर्द्धते प्रतिभागेन च असंख्यलोकेन।

अवरस्थितेः ज्येष्ठस्थितिपरिणाम इति नियमेन॥964॥)

ग्रन्थकर्त्ता की प्रशस्ति

गोम्मटसंगहसुत्तं गोम्मटदेवेण गोम्मटं रइयं।

कम्माण णिज्जरट्ठं तच्चट्ठवधारणट्ठं च॥965॥

(गोम्मटसंग्रहसूत्रं गोम्मटदेवेन गोम्मटं चरितम्।

कर्मणां निर्जरार्थं तत्त्वार्थावधारणार्थं च॥965॥)

जम्हि गुणा विस्संता गणहरदेवादिइड्ढिपत्ताणं।

सो अजियसेणणाहो जस्स गुरू जयउ सो राओ॥966॥

(यस्मिन् गुणा विश्रान्ता गणधरदेवादिऋद्धिप्राप्तानाम्।

सः अजितसेननाथो यस्य गुरुर्जयतु स रायः॥966॥)

सिद्धंतुदयतडुग्गयणिम्मलवरणेमिचंदकरकलिया।

गुणरयणभूसणंबुहिमइवेला भरउ भुवणयलं॥967॥

(सिद्धान्तोदयतटोद्गतनिर्मलवरनेमिचन्द्रकरकलिता।

गुणरत्नभूषणाम्बुधिमतिवेला भरतु भुवनतलम्॥967॥)

गोम्मटसंगहसुत्तं गोम्मटसिहरुवरि गोम्मटजिणो य।

गोम्मटरायविणिम्मियदक्खिणकुक्कडजिणो जयउ॥968॥

(गोम्मटसंग्रहसूत्रं गोम्मटशिखरोपरि गोम्मटजिनश्च।

गोम्मटरायविनिर्मितदक्षिणकुक्कटजिनो जयतु॥968॥)

जेण विणिम्मयपडिमावयणं सव्वट्ठसिद्धिदेवेहिं।

सव्वपरमोहिजोगिहिं दिट्ठं सो गोम्मटो जयउ॥969॥

(येन विनिर्मितप्रतिमावदनं सर्वार्थसिद्धिदेवैः।

सर्वपरमावधियोगिभिः दृष्टं स गोम्मटो जयतु॥969॥)

वज्जयणं जिणभवणं ईसिपभारं सुवण्णकलसं तु।

तिहुवणपडिमाणिक्कं जेण कयं जयउ सो राओ॥970॥

(वज्रतलं जिनभवनमीषत्प्राग्भारं सुवर्णकलशं तु।

त्रिभुवनप्रतिमानमेकं येन कृतं जयतु स रायः॥970॥)

जेणुब्भियथंभुवरिमजक्खतिरीटग्गकिरणजलधोया।

सिद्धाण सुद्धपाया सो राओ गोम्मटो जयउ॥971॥

(येनोद्भितस्तम्भोपरिमयक्षतिरीटाग्रकिरणजलधौतौ।

सिद्धानां शुद्धपादौ स रायो गोम्मटो जयतु॥971॥)

गोम्मटसुत्तल्लिहणे गोम्मटरायेण जा कया देसी।

सो राओ चिरकालं णामेण य वीरमत्तंडी॥972॥

(गोम्मटसूत्रलेखने गोम्मटरायेन या कृता देशी।

स रायः चिरकालं नाम्ना च वीरमार्तण्डी॥972॥)

इति गोम्मटसारस्य कर्मकाण्डं संस्कृतच्छायासहितं समाप्तम्।